# শ্রীআঞ্জনেযসহস্রনামস্তোত্রং হনুমৎসহস্রনামস্তোত্রং চ

{॥ শ্রীআঞ্জনেযসহস্রনামস্তোত্রম্ ॥}

ঋষয ঊচুঃ

কো মন্ত্রঃ কিমু তদ্ধ্যানং তন্নো ব্রূহি যথার্থতঃ ।

কথাসুধারসং পীত্বা ন তৃপ্যামঃ পরন্তপ ॥ ১॥

বাল্মীকিরুবাচ

মন্ত্রং হনুমতো বিদ্ধি ভুক্তিমুক্তিপ্রদাযকম্ ।

মহারিষ্টমহাপাপসর্বদুঃখনিবারণম্ ॥ ২॥

ওঁ ঐং হ্রীং শ্রীং । হনূমতে রামদূতায

লঙ্কাবিধ্বংসনাযাঞ্জনাগর্ভসম্ভূতায

শাকিনী ডাকিনী বিধ্বংসনায কিলিকিলি ভুভুকারিণে বিভীষণায

হনুমতে দেবায ওং হ্রীং হ্রৌং হ্রাং হ্রূং ফট্ স্বাহা ॥

অন্যং হনুমতো মন্ত্রং সহস্রং নামসঞ্জ্ঞিতম্ ।

জানন্তু ঋষযঃ সর্বে মহাদুরিতনাশনম্ ॥ ৩॥

যস্য সংস্মরণাত্ সীতাং লব্ধ্বা রাজ্যমকণ্টকম্ ।

বিভীষণায চ দদাবাত্মানং লব্ধবান্ যথা ॥ ৪॥

Stotram Digitalized By Sanskritdocuments.org

ঋষয ঊচুঃ

সহস্রনামসন্মন্ত্রং দুঃখাঘৌঘনিবারণম্ ।

বাল্মীকে ব্রূহি নস্তূর্ণং শুশ্রূষামঃ কথাং পরাম্ ॥

বাল্মীকিরুবাচ

শৃণ্বন্তু ঋষযঃ সর্বে সহস্রনামকং স্তবম্ ।

স্তবানামুত্তমং দিব্যং সদর্থস্য প্রকাশকম্ ॥

অস্য শ্রীহনুমৎসহস্রনামস্তোত্রমহামন্ত্রস্য শ্রীরামচন্দ্র ঋষিঃ,

হনূমান্ দেবতা । অনুষ্টুপ্ ছন্দঃ । হ্রাং হ্রীং হূং হ্রঃ বীজম্ । শ্রীরিতি শক্তিঃ ।

কিলিকিলি ভূ ভূ কারেণেতি কীলকম্ । লঙ্কাবিধ্বংসনাযেতি কবচম্ ।

মম সর্বোপদ্রবশান্ত্যর্থং সর্বকামানাং সিদ্ধ্যর্থং জপে বিনিযোগঃ ।

ওঁ ঐং হ্রীং হনুমতে রামদূতায অঙ্গুষ্ঠাভ্যাং নমঃ ।

লঙ্কাবিধ্বংসনায তর্জনীভ্যাং নমঃ ।

অঞ্জনাগর্ভসম্ভূতায মধ্যমাভ্যাং নমঃ ।

শাকিনী ডাকিনী বিধ্বংসনায অনামিকাভ্যাং নমঃ ।

ওঁ কিলি কিলি ভূ ভূ কারেণ বিভীষণায হনূমতে দেবায কনিষ্ঠিকাভ্যাং নমঃ ।

ওঁ শ্রীং হ্রীং হূং হ্রাং ফট্ স্বাহা করতলকরপৃষ্ঠাভ্যাং নমঃ ।

ওঁ হনুমতে রামদূতায হৃদযায নমঃ ।

লঙ্কাবিধ্বংসনায শিরসে স্বাহা নমঃ ।

ওঁ হ্রৌং অঞ্জনাগর্ভসম্ভূতায শিখাযৈ বৌষট্ ।

ওঁ হ্রাং শাকিনীডাকিনী ধ্বংসনায কবচায হুম্ ।

ওঁ কিলি কিলি ভূ ভূ কারেণ বিভীষণায হনুমতে দেবায নেত্রত্রযায বৌষট্ ।

ওঁ শ্রীং হ্রীং হ্রৌং হ্রাং ফট্ স্বাহা । অস্ত্রায ফট্ ।

ধ্যানম্

প্রতপ্তস্বর্ণবর্ণাভং সংরক্তারুণলোচনম্ ।

সুগ্রীবাদিযুতং ধ্যাযেত্ পীতাম্বরসমাবৃতম্ ॥

গোষ্পদীকৃতবারাশিং পুচ্ছমস্তকমীশ্বরম্ ।

জ্ঞানমুদ্রাং চ বিভ্রাণং সর্বালঙ্কারভূষিতম্ ॥

বামহস্তসমাকৃষ্টদশাস্যাননমণ্ডলম্ ।

উদ্যদ্দক্ষিণদোর্দণ্ডং হনূমন্তং বিচিন্তযেত্ ॥

হনূমান্ শ্রীপ্রদো বাযুপুত্রো রুদ্রো নযোঽজরঃ ।

অমৃত্যুর্বীরবীরশ্চ গ্রামবাসো জনাশ্রযঃ ॥ ১॥

ধনদো নির্গুণাকারো বীরো নিধিপতির্মুনিঃ ।

পিঙ্গাক্ষো বরদো বাগ্মী সীতাশোকবিনাশনঃ ॥ ২॥

শিবঃ শর্বঃ পরোঽব্যক্তো ব্যক্তাব্যক্তো ধরাধরঃ ।

পিঙ্গকেশঃ পিঙ্গরোমা শ্রুতিগম্যঃ সনাতনঃ ॥ ৩॥

অনাদির্ভগবান্ দিব্যো বিশ্বহেতুর্নরাশ্রযঃ ।

আরোগ্যকর্তা বিশ্বেশো বিশ্বনাথো হরীশ্বরঃ ॥ ৪॥

ভর্গো রামো রামভক্তঃ কল্যাণপ্রকৃতীশ্বরঃ ।

বিশ্বম্ভরো বিশ্বমূর্তির্বিশ্বাকারোঽথ বিশ্বপঃ ॥ ৫॥

বিশ্বাত্মা বিশ্বসেব্যোঽথ বিশ্বো বিশ্বধরো রবিঃ ।

বিশ্বচেষ্টো বিশ্বগম্যো বিশ্বধ্যেযঃকলাধরঃ ॥ ৬॥

প্লবঙ্গমঃ কপিশ্রেষ্ঠো জ্যেষ্ঠো বেদ্যো বনেচরঃ ।

বালো বৃদ্ধো যুবা তত্ত্বং তত্ত্বগম্যঃ সখা হ্যজঃ ॥ ৭॥

অঞ্জনাসূনুরব্যগ্রো গ্রামস্যান্তো ধরাধরঃ ।

ভূর্ভুবঃস্বর্মহর্লোকো জনোলোকস্তপোঽব্যযঃ ॥ ৮॥

সত্যমোঙ্কারগম্যশ্চ প্রণবো ব্যাপকোঽমলঃ ।

শিবধর্মপ্রতিষ্ঠাতা রামেষ্টঃ ফল্গুনপ্রিযঃ ॥ ৯॥

গোষ্পদীকৃতবারীশঃ পূর্ণকামো ধরাপতিঃ ।

রক্ষোঘ্নঃ পুণ্ডরীকাক্ষঃ শরণাগতবৎসলঃ ॥ ১০॥

জানকীপ্রাণদাতা চ রক্ষঃপ্রাণাপহারকঃ ।

পূর্ণঃ সত্যঃ পীতবাসা দিবাকরসমপ্রভঃ ॥ ১১॥

দ্রোণহর্তা শক্তিনেতা শক্তিরাক্ষসমারকঃ ।

অক্ষঘ্নো রামদূতশ্চ শাকিনীজীবিতাহরঃ ॥ ১২॥

বুভূকারহতারাতির্গর্বপর্বতমর্দনঃ ।

হেতুস্ত্বহেতুঃ প্রাংশুশ্চ বিশ্বকর্তা জগদ্গুরুঃ ॥ ১৩॥

জগন্নাথো জগন্নেতা জগদীশো জনেশ্বরঃ ।

জগৎশ্রিতো হরিঃ শ্রীশো গরুডস্ময়ভঞ্জকঃ ॥ ১৪॥

পার্থধ্বজো বায়ুপুত্রঃ সিতপুচ্ছোঽমিতপ্রভঃ ।

ব্রহ্মপুচ্ছঃ পরব্রহ্মপুচ্ছো রামেষ্টকারকঃ ॥ ১৫॥

সুগ্রীবাদিযুতো জ্ঞানী বানরো বানরেশ্বরঃ ।

কল্পস্থায়ী চিরঞ্জীবী প্রসন্নশ্চ সদাশিবঃ ॥ ১৬॥

সন্মতিঃ সদ্গতির্ভুক্তিমুক্তিদঃ কীর্তিদায়কঃ ।

কীর্তিঃ কীর্তিপ্রদশ্চৈব সমুদ্রঃ শ্রীপ্রদঃ শিবঃ ॥ ১৭॥

উদধিক্রমণো দেবঃ সংসারভয়নাশনঃ ।

বালিবন্ধনকৃদ্বিশ্বজেতা বিশ্বপ্রতিষ্ঠিতঃ ॥ ১৮॥

লঙ্কারিঃ কালপুরুষো লঙ্কেশগৃহভঞ্জনঃ ।

ভূতাবাসো বাসুদেবো বসুস্ত্রিভুবনেশ্বরঃ ॥

শ্রীরামরূপঃ কৃষ্ণস্তু লঙ্কাপ্রাসাদভঞ্জনঃ ।

কৃষ্ণঃ কৃষ্ণস্তুতঃ শান্তঃ শান্তিদো বিশ্বভাবনঃ ॥ ২০॥

বিশ্বভোক্তাঽথ মারঘ্নো ব্রহ্মচারী জিতেন্দ্রিয়ঃ ।

ঊর্ধ্বগো লাঙ্গুলী মালী লাঙ্গূলাহতরাক্ষসঃ ॥ ২১॥

সমীরতনুজো বীরো বীরমারো জয়প্রদঃ ।

জগন্মঙ্গলদঃ পুণ্যঃ পুণ্যশ্রবণকীর্তনঃ ॥ ২২॥

পুণ্যকীর্তিঃ পুণ্যগীতির্জগৎপাবনপাবনঃ ।

দেবেশোঽমিতরোমাঽথ রামভক্তবিধায়কঃ ॥ ২৩॥

ধ্যাতা ধ্যেয়ো জগৎসাক্ষী চেতা চৈতন্যবিগ্রহঃ ।

জ্ঞানদঃ প্রাণদঃ প্রাণো জগৎপ্রাণঃ সমীরণঃ ॥ ২৪॥

বিভীষণপ্রিয়ঃ শূরঃ পিপ্পলাশ্রয়সিদ্ধিদঃ ।

সিদ্ধঃ সিদ্ধাশ্রয়ঃ কালঃ কালভক্ষকপূজিতঃ ॥ ২৫॥

লঙ্কেশনিধনস্থায়ী লঙ্কাদাহক ঈশ্বরঃ ।

চন্দ্রসূর্যাগ্নিনেত্রশ্চ কালাগ্নিঃ প্রলয়ান্তকঃ ॥ ২৬॥

কপিলঃ কপিশঃ পুণ্যরাতির্দ্বাদশরাশিগঃ ।

সর্বাশ্রয়োঽপ্রমেযাত্মা রেবত্যাদিনিবারকঃ ॥ ২৭॥

লক্ষ্মণপ্রাণদাতা চ সীতাজীবনহেতুকঃ ।

রামধ্যাযী হৃষীকেশো বিষ্ণুভক্তো জটী বলী ॥ ২৮॥

দেবারিদর্পহা হোতা ধাতা কর্তা জগৎপ্রভুঃ ।

নগরগ্রামপালশ্চ শুদ্ধো বুদ্ধো নিরন্তরঃ ॥ ২৯॥

নিরঞ্জনো নির্বিকল্পো গুণাতীতো ভযঙ্করঃ ।

হনুমাংশ্চ দুরারাধ্যস্তপঃসাধ্যো মহেশ্বরঃ ॥ ৩০॥

জানকীঘনশোকোত্থতাপহর্তা পরাশরঃ ।

বাঙ্মযঃ সদসদ্রূপঃ কারণং প্রকৃতেঃ পরঃ ॥ ৩১॥

ভাগ্যদো নির্মলো নেতা পুচ্ছলঙ্কাবিদাহকঃ ।

পুচ্ছবদ্ধো যাতুধানো যাতুধানরিপুপ্রিযঃ ॥ ৩২॥

ছাযাপহারী ভূতেশো লোকেশঃ সদ্গতিপ্রদঃ ।

প্লবঙ্গমেশ্বরঃ ক্রোধঃ ক্রোধসংরক্তলোচনঃ ॥ ৩৩॥

ক্রোধহর্তা তাপহর্তা ভক্তাভযবরপ্রদঃ ।

ভক্তানুকম্পী বিশ্বেশঃ পুরুহূতঃ পুরন্দরঃ ॥ ৩৪॥

অগ্নির্বিভাবসুর্ভাস্বান্ যমো নিরৃতিরেব চ ।

বরুণো বায়ুগতিমান্ বায়ুঃ কুবের ঈশ্বরঃ ॥ ৩৫॥

রবিশ্চন্দ্রঃ কুজঃ সৌম্যো গুরুঃ কাব্যঃ শনৈশ্চরঃ ।

রাহুঃ কেতুর্মরুদ্দাতা ধাতা হর্তা সমীরজঃ ॥ ৩৬॥

মশকীকৃতদেবারির্দৈত্যারির্মধুসূদনঃ ।

কামঃ কপিঃ কামপালঃ কপিলো বিশ্বজীবনঃ ॥ ৩৭॥

ভাগীরথীপদাম্ভোজঃ সেতুবন্ধবিশারদঃ ।

স্বাহা স্বধা হবিঃ কব্যং হব্যবাহঃ প্রকাশকঃ ॥ ৩৮॥

স্বপ্রকাশো মহাবীরো মধুরোঽমিতবিক্রমঃ ।

উড্ডীনোড্ডীনগতিমান্ সদ্গতিঃ পুরুষোত্তমঃ ॥

জগদাত্মা জগদ্যোনির্জগদন্তো হ্যনন্তরঃ ।

বিপাপ্মা নিষ্কলঙ্কোঽথ মহান্ মহদহঙ্কৃতিঃ ॥ ৪০॥

খং বায়ুঃ পৃথিবী চাপো বহ্নির্দিক্ কাল একলঃ ।

ক্ষেত্রজ্ঞঃ ক্ষেত্রপালশ্চ পল্বলীকৃতসাগরঃ ॥ ৪১॥

হিরণ্ময়ঃ পুরাণশ্চ খেচরো ভূচরো মনুঃ ।
হিরণ্যগর্ভঃ সূত্রাত্মা রাজরাজো বিশাং পতিঃ ॥ ৪২॥

বেদান্তবেদ্য উদ্গীথো বেদাঙ্গো বেদপারগঃ ।
প্রতিগ্রামস্থিতঃ সদ্যঃ স্ফূর্তিদাতা গুণাকরঃ ॥ ৪৩॥

নক্ষত্রমালী ভূতাত্মা সুরভিঃ কল্পপাদপঃ ।
চিন্তামণির্গুণনিধিঃ প্রজাদ্বারমনুত্তমঃ ॥ ৪৪॥

পুণ্যশ্লোকঃ পুরারাতিঃ মতিমান্ শর্বরীপতিঃ ।
কিল্কিলারাবসন্ত্রস্তভূতপ্রেতপিশাচকঃ ॥ ৪৫॥

ঋণত্রয়হরঃ সূক্ষ্মঃ স্থূলঃ সর্বগতিঃ পুমান্ ।
অপস্মারহরঃ স্মর্তা শ্রুতির্গাথা স্মৃতির্মনুঃ ॥ ৪৬॥

স্বর্গদ্বারং প্রজাদ্বারং মোক্ষদ্বারং যতীশ্বরঃ ।
নাদরূপং পরং ব্রহ্ম ব্রহ্ম ব্রহ্মপুরাতনঃ ॥ ৪৭॥

একোঽনেকো জনঃ শুক্লঃ স্বয়ঞ্জ্যোতিরনাকুলঃ ।
জ্যোতির্জ্যোতিরনাদিশ্চ সাত্ত্বিকো রাজসত্তমঃ ॥ ৪৮॥

তমোহর্তা নিরালম্বো নিরাকারো গুণাকরঃ ।

গুণাশ্রয়ো গুণময়ো বৃহৎকায়ো বৃহদ্যশাঃ ॥

বৃহদ্ধনুর্বৃহৎপাদো বৃহন্মূর্ধা বৃহৎস্বনঃ ।

বৃহৎকর্ণো বৃহন্নাসো বৃহদ্বাহুর্বৃহত্তনুঃ ॥ ৫০॥

বৃহদ্গলো বৃহৎকায়ো বৃহৎপুচ্ছো বৃহৎকরঃ ।

বৃহদ্গতির্বৃহৎসেবো বৃহল্লোকফলপ্রদঃ ॥ ৫১॥

বৃহদ্ভক্তির্বৃহদ্বাঞ্ছাফলদো বৃহদীশ্বরঃ ।

বৃহল্লোকনুতো দ্রষ্টা বিদ্যাদাতা জগদ্গুরুঃ ॥ ৫২॥

দেবাচার্যঃ সত্যবাদী ব্রহ্মবাদী কলাধরঃ ।

সপ্তপাতালগামী চ মলযাচলসংশ্রয়ঃ ॥ ৫৩॥

উত্তরাশাস্থিতঃ শ্রীশো দিব্যৌষধিবশঃ খগঃ ।

শাখামৃগঃ কপীন্দ্রোঽথ পুরাণঃ প্রাণচঞ্চুরঃ ॥ ৫৪॥

চতুরো ব্রাহ্মণো যোগী যোগিগম্যঃ পরোঽবরঃ ।

অনাদিনিধনো ব্যাসো বৈকুণ্ঠঃ পৃথিবীপতিঃ ॥ ৫৫॥

অপরাজিতো জিতারাতিঃ সদানন্দদ ঈশিতা ।

গোপালো গোপতির্যোদ্ধা কলিঃ স্ফালঃ পরাৎপরঃ ॥ ৫৬॥

মনোবেগী সদাযোগী সংসারভযনাশনঃ ।

তত্ত্বদাতাঽথ তত্ত্বজ্ঞস্তত্ত্বং তত্ত্বপ্রকাশকঃ ॥ ৫৭॥

শুদ্ধো বুদ্ধো নিত্যযুক্তো ভক্তাকারো জগদ্রথঃ ।

প্রলযোঽমিতমাযশ্চ মাযাতীতো বিমৎসরঃ ॥ ৫৮॥

মাযানির্জিতরক্ষাশ্চ মাযানির্মিতবিষ্টপঃ ।

মাযাশ্রযশ্চ নিলের্পো মাযানির্বর্তকঃ সুখী ॥

সুখী(খং) সুখপ্রদো নাগো মহেশকৃতসংস্তবঃ ।

মহেশ্বরঃ সত্যসন্ধঃ শরভঃ কলিপাবনঃ ॥ ৬০॥

রসো রসজ্ঞঃ সন্মানো রূপং চক্ষুঃ শ্রুতী রবঃ ।

ঘ্রাণং গন্ধঃ স্পর্শনং চ স্পর্শো হিঙ্কারমানগঃ ॥ ৬১॥

নেতি নেতীতি গম্যশ্চ বৈকুণ্ঠভজনপ্রিযঃ ।

গিরিশো গিরিজাকান্তো দুর্বাসাঃ কবিরঙ্গিরাঃ ॥ ৬২॥

ভৃগুর্বসিষ্ঠশ্চ্যবনো নারদস্তুম্বুরুর্হরঃ ।

বিশ্বক্ষেত্রং বিশ্ববীজং বিশ্বনেত্রং চ বিশ্বপঃ ॥ ৬৩॥

যাজকো যজমানশ্চ পাবকঃ পিতরস্তথা ।

শ্রদ্ধা বুদ্ধিঃ ক্ষমা তন্দ্রা মন্ত্রো মন্ত্রযিতা সুরঃ ॥ ৬৪॥

রাজেন্দ্রো ভূপতী রূঢো মালী সংসারসারথিঃ ।

নিত্যঃ সম্পূর্ণকামশ্চ ভক্তকামধুগুত্তমঃ ॥ ৬৫॥

গণপঃ কেশবো ভ্রাতা পিতা মাতাঽথ মারুতিঃ ।

সহস্রমূর্ধা সহস্রাস্যঃ সহস্রাক্ষঃ সহস্রপাত্ ॥ ৬৬॥

কামজিত্ কামদহনঃ কামঃ কাম্যফলপ্রদঃ ।

মুদ্রোপহারী রক্ষোঘ্নঃ ক্ষিতিভারহরো বলঃ ॥ ৬৭॥

নখদংষ্ট্রাযুধো বিষ্ণুভক্তো ভক্তাভযপ্রদঃ ।

দর্পহা দর্পদো দংষ্ট্রাশতমূর্তিরমূর্তিমান্ ॥ ৬৮॥

মহানিধির্মহাভাগো মহাভর্গো মহর্দ্ধিদঃ ।

মহাকারো মহাযোগী মহাতেজা মহাদ্যুতিঃ ॥

মহাকর্মা মহানাদো মহামন্ত্রো মহামতিঃ ।

মহাশমো মহোদারো মহাদেবাত্মকো বিভুঃ ॥ ৭০॥

রুদ্রকর্মা ক্রূরকর্মা রত্ননাভঃ কৃতাগমঃ ।

অম্ভোধিলঙ্ঘনঃ সিদ্ধঃ সত্যধর্মা প্রমোদনঃ ॥ ৭১॥

জিতামিত্রো জয়ঃ সোমো বিজয়ো বায়ুবাহনঃ ।

জীবো ধাতা সহস্রাংশুর্মুকুন্দো ভূরিদক্ষিণঃ ॥ ৭২ ॥

সিদ্ধার্থঃ সিদ্ধিদঃ সিদ্ধঃ সঙ্কল্পঃ সিদ্ধিহেতুকঃ ।

সপ্তপাতালচরণঃ সপ্তর্ষিগণবন্দিতঃ ॥ ৭৩॥

সপ্তাব্ধিলঙ্ঘনো বীরঃ সপ্তদ্বীপোরুমণ্ডলঃ ।

সপ্তাঙ্গরাজ্যসুখদঃ সপ্তমাতৃনিষেবিতঃ ॥ ৭৪ ॥

সপ্তলোকৈকমকুটঃ সপ্তহোত্রঃ স্বরাশ্রয়ঃ ।

সপ্তসামোপগীতশ্চ সপ্তপাতালসংশ্রয়ঃ ॥ ৭৫ ॥

সপ্তচ্ছন্দোনিধিঃ সপ্তচ্ছন্দঃ সপ্তজনাশ্রয়ঃ ।

মেধাদঃ কীর্তিদঃ শোকহারী দৌর্ভাগ্যনাশনঃ ॥ ৭৬॥

সর্ববশ্যকরো গর্ভদোষহা পুত্রপৌত্রদঃ ।

প্রতিবাদিমুখস্তম্ভো রুষ্টচিত্তপ্রসাদনঃ ॥ ৭৭॥

পরাভিচারশমনো দুঃখহা বন্ধমোক্ষদঃ ।

নবদ্বারপুরাধারো নবদ্বারনিকেতনঃ ॥ ৭৮॥

নরনারায়ণস্তুত্যো নবনাথমহেশ্বরঃ ।

মেখলী কবচী খড্গী ভ্রাজিষ্ণুর্জিষ্ণুসারথিঃ ॥

বহুযোজনবিস্তীর্ণপুচ্ছঃ পুচ্ছহতাসুরঃ ।

দুষ্টহন্তা নিযমিতা পিশাচগ্রহশাতনঃ ॥ ৮০॥

বালগ্রহবিনাশী চ ধর্মনেতা কৃপাকরঃ ।

উগ্রকৃত্যশ্চোগ্রবেগ উগ্রনেত্রঃ শতক্রতুঃ ॥ ৮১॥

শতমন্যুস্তুতঃ স্তুত্যঃ স্তুতিঃ স্তোতা মহাবলঃ ।

সমগ্রগুণশালী চ ব্যগ্রো রক্ষোবিনাশনঃ ॥ ৮২॥

রক্ষোঽগ্নিদাবো ব্রহ্মেশঃ শ্রীধরো ভক্তবৎসলঃ ।

মেঘনাদো মেঘরূপো মেঘবৃষ্টিনিবারণঃ ॥ ৮৩॥

মেঘজীবনহেতুশ্চ মেঘশ্যামঃ পরাত্মকঃ ।

সমীরতনযো ধাতা তত্ত্ববিদ্যাবিশারদঃ ॥ ৮৪॥

অমোঘোঽমোঘবৃষ্টিশ্চাভীষ্টদোঽনিষ্টনাশনঃ ।

অর্থোঽনর্থাপহারী চ সমর্থো রামসেবকঃ ॥ ৮৫॥

অর্থী ধন্যোঽসুরারাতিঃ পুণ্ডরীকাক্ষ আত্মভূঃ ।

সঙ্কর্ষণো বিশুদ্ধাত্মা বিদ্যারাশিঃ সুরেশ্বরঃ ॥ ৮৬॥

অচলোদ্ধারকো নিত্যঃ সেতুকৃদ্রামসারথিঃ ।
আনন্দঃ পরমানন্দো মৎস্যঃ কূর্মো নিধিঃ শয়ঃ ॥ ৮৭॥

বরাহো নারসিংহশ্চ বামনো জমদগ্নিজঃ ।
রামঃ কৃষ্ণঃ শিবো বুদ্ধঃ কল্কী রামাশ্রয়ো হরিঃ ॥ ৮৮॥

নন্দী ভৃঙ্গী চ চণ্ডী চ গণেশো গণসেবিতঃ ।
কর্মাধ্যক্ষঃ সুরারামো বিশ্রামো জগতীপতিঃ ॥

জগন্নাথঃ কপীশশ্চ সর্বাবাসঃ সদাশ্রয়ঃ ।
সুগ্রীবাদিস্তুতো দান্তঃ সর্বকর্মা প্লবঙ্গমঃ ॥ ৯০॥

নখদারিতরক্ষশ্চ নখযুদ্ধবিশারদঃ ।
কুশলঃ সুধনঃ শেষো বাসুকিস্তক্ষকস্তথা ॥ ৯১॥

স্বর্ণবর্ণো বলাঢ্যশ্চ পুরুজেতাঽঘনাশনঃ ।
কৈবল্যদীপঃ কৈবল্যো গরুডঃ পন্নগো গুরুঃ ॥ ৯২॥

ক্লীক্লীরাবহতারাতিগর্বঃ পর্বতভেদনঃ ।
বজ্রাঙ্গো বজ্রবক্ত্রশ্চ ভক্তবজ্রনিবারকঃ ॥ ৯৩॥

নখাযুধো মণিগ্রীবো জ্বালামালী চ ভাস্করঃ ।

প্রৌঢপ্রতাপস্তপনো ভক্ততাপনিবারকঃ ॥ ৯৪॥

শরণং জীবনং ভোক্তা নানাচেষ্টোঽথ চঞ্চলঃ ।

স্বস্থস্ত্বস্বাস্থ্যহা দুঃখশাতনঃ পবনাত্মজঃ ॥ ৯৫॥

পবনঃ পাবনঃ কান্তো ভক্তাঙ্গঃ সহনো বলঃ ।

মেঘনাদরিপুর্মেঘনাদসংহৃতরাক্ষসঃ ॥ ৯৬॥

ক্ষরোঽক্ষরো বিনীতাত্মা বানরেশঃ সতাঙ্গতিঃ ।

শ্রীকণ্ঠঃ শিতিকণ্ঠশ্চ সহায়ঃ সহনায়কঃ ॥ ৯৭॥

অস্থূলস্ত্বনণুর্ভর্গো দেবসংসৃতিনাশনঃ ।

অধ্যাত্মবিদ্যাসারশ্চাপ্যধ্যাত্মকুশলঃ সুধীঃ ॥ ৯৮॥

অকল্মষঃ সত্যহেতুঃ সত্যদঃ সত্যগোচরঃ ।

সত্যগর্ভঃ সত্যরূপঃ সত্যঃ সত্যপরাক্রমঃ ॥ ৯৯॥

অঞ্জনাপ্রাণলিঙ্গং চ বায়ুবংশোদ্ভবঃ শ্রুতিঃ ।

ভদ্ররূপো রুদ্ররূপঃ সুরূপশ্চিত্ররূপধৃক্ ॥ ১০০॥

মৈনাকবন্দিতঃ সূক্ষ্মদর্শনো বিজয়ো জয়ঃ ।

ক্রান্তদিঙ্মণ্ডলো রুদ্রঃ প্রকটীকৃতবিক্রমঃ ॥ ১০১॥

কম্বুকণ্ঠঃ প্রসন্নাত্মা হ্রস্বনাসো বৃকোদরঃ ।

লম্বোষ্ঠঃ কুণ্ডলী চিত্রমালী যোগবিদাং বরঃ ॥ ১০২॥

বিপশ্চিত্ কবিরানন্দবিগ্রহোঽনল্পনাশনঃ ।

ফাল্গুনীসূনুরব্যগ্রো যোগাত্মা যোগতৎপরঃ ॥ ১০৩॥

যোগবিদ্যোগকর্তা চ যোগযোনির্দিগম্বরঃ ।

অকারাদিক্ষকারান্তবর্ণনির্মিতবিগ্রহঃ ॥ ১০৪॥

উলূখলমুখঃ সিদ্ধসংস্তুতঃ পরমেশ্বরঃ ।

শ্লিষ্টজঙ্ঘঃ শ্লিষ্টজানুঃ শ্লিষ্টপাণিঃ শিখাধরঃ ॥ ১০৫॥

সুশর্মাঽমিতধর্মা চ নারাযণপরাযণঃ ।

জিষ্ণুর্ভবিষ্ণূ রোচিষ্ণুর্গ্রসিষ্ণুঃ স্থাণুরেব চ ॥ ১০৬॥

হরী রুদ্রানুকৃদ্বৃক্ষকম্পনো ভূমিকম্পনঃ ।

গুণপ্রবাহঃ সূত্রাত্মা বীতরাগঃ স্তুতিপ্রিযঃ ॥ ১০৭॥

নাগকন্যাভযধ্বংসী কৃতপূর্ণঃ কপালভৃত্ ।

অনুকূলোঽক্ষযোঽপাযোঽনপাযো বেদপারগঃ ॥ ১০৮॥

অক্ষরঃ পুরুষো লোকনাথস্ত্র্যক্ষঃ প্রভুর্দৃঢঃ ।

অষ্টাঙ্গযোগফলভূঃ সত্যসন্ধঃ পুরুষ্টুতঃ ॥ ১০৯॥

শ্মশানস্থাননিলযঃ প্রেতবিদ্রাবণক্ষমঃ ।

পঞ্চাক্ষরপরঃ পঞ্চমাতৃকো রঞ্জনো ধ্বজঃ ॥ ১১০॥

যোগিনীবৃন্দবন্দ্যশ্রীঃ শত্রুঘ্নোঽনন্তবিক্রমঃ ।

ব্রহ্মচারীন্দ্রিযবপুর্ধৃতদণ্ডো দশাত্মকঃ ॥ ১১১॥

অপ্রপঞ্চঃ সদাচারঃ শূরসেনো বিদারকঃ ।

বুদ্ধঃ প্রমোদ আনন্দঃ সপ্তজিহ্বপতির্ধরঃ ॥ ১১২॥

নবদ্বারপুরাধারঃ প্রত্যগ্রঃ সামগাযনঃ ।

ষটচক্রধামা স্বর্লোকভযহৃন্মানদো মদঃ ॥ ১১৩॥

সর্ববশ্যকরঃ শক্তিরনন্তোঽনন্তমঙ্গলঃ ।

অষ্টমূর্তিধরো নেতা বিরূপঃ স্বরসুন্দরঃ ॥ ১১৪॥

ধূমকেতুর্মহাকেতুঃ সত্যকেতুর্মহারথঃ ।

নন্দীপ্রিযঃ স্বতন্ত্রশ্চ মেখলী ডমরুপ্রিযঃ ॥ ১১৫॥

লোহিতাঙ্গঃ সমিদ্বহ্নিঃ ষড়ৃতুঃ শর্ব ঈশ্বরঃ ।

ফলভুক্ ফলহস্তশ্চ সর্বকর্মফলপ্রদঃ ॥ ১১৬॥

Stotram Digitalized By Sanskritdocuments.org

ধর্মাধ্যক্ষো ধর্মফলো ধর্মো ধর্মপ্রদোঽর্থদঃ ।

পঞ্চবিংশতিতত্ত্বজ্ঞস্তারকো ব্রহ্মতৎপরঃ ॥ ১১৭॥

ত্রিমার্গবসতির্ভীমঃ সর্বদুষ্টনিবর্হণঃ ।

ঊর্জঃস্বামী জলস্বামী শূলী মালী নিশাকরঃ ॥ ১১৮॥

রক্তাম্বরধরো রক্তো রক্তমাল্যবিভূষণঃ ।

বনমালী শুভাঙ্গশ্চ শ্বেতঃ শ্বেতাম্বরো যুবা ॥ ১১৯॥

জয়োঽজেয়পরীবারঃ সহস্রবদনঃ কবিঃ ।

শাকিনীডাকিনীযক্ষরক্ষোভূতপ্রভঞ্জনঃ ॥ ১২০॥

সদ্যোজাতঃ কামগতির্জ্ঞানমূর্তির্যশস্করঃ ।

শম্ভুতেজাঃ সার্বভৌমো বিষ্ণুভক্তঃ প্লবঙ্গমঃ ॥ ১২১॥

চতুর্নবতিমন্ত্রজ্ঞঃ পৌলস্ত্যবলদর্পহা ।

সর্বলক্ষ্মীপ্রদঃ শ্রীমানঙ্গদপ্রিয়বর্ধনঃ ॥ ১২২॥

স্মৃতিবীজং সুরেশানঃ সংসারভয়নাশনঃ ।

উত্তমঃ শ্রীপরীবারঃ শ্রীভূরুগ্রশ্চ কামধুক্ ॥ ১২৩॥

সদাগতির্মাতরিশ্বা রামপাদাব্জষট্পদঃ ।

নীলপ্রিযো নীলবর্ণো নীলবর্ণপ্রিযঃ সুহৃত্ ॥ ১২৪॥

রামদূতো লোকবন্ধুরন্তরাত্মা মনোরমঃ ।
শ্রীরামধ্যানকৃদ্বীরঃ সদা কিম্পুরুষস্তুতঃ ॥ ১২৫॥

রামকার্যান্তরঙ্গশ্চ শুদ্ধির্গতিরনামযঃ ।
পুণ্যশ্লোকঃ পরানন্দঃ পরেশপ্রিযসারথিঃ ॥ ১২৬॥

লোকস্বামী মুক্তিদাতা সর্বকারণকারণঃ ।
মহাবলো মহাবীরঃ পারাবারগতির্গুরুঃ ॥ ১২৭॥

তারকো ভগবাংস্ত্রাতা স্বস্তিদাতা সুমঙ্গলঃ ।
সমস্তলোকসাক্ষী চ সমস্তসুরবন্দিতঃ ।
অঈতাসমেতশ্রীরামপাদসেবাধুরন্ধরঃ ॥ ১২৮॥

ইদং নামসহস্রং তু যোঽধীতে প্রত্যহং নরঃ ।
দুঃখৌঘো নশ্যতে ক্ষিপ্রং সম্পত্তির্বর্ধতে চিরম্ ।
বশ্যং চতুর্বিধং তস্য ভবত্যেব ন সংশযঃ ॥ ১২৯॥

রাজানো রাজপুত্রাশ্চ রাজকীযাশ্চ মন্ত্রিণঃ ।
ত্রিকালং পঠনাদস্য দৃশ্যন্তে চ ত্রিপক্ষতঃ ॥ ১৩০॥

অশ্বত্থমূলে জপতাং নাস্তি বৈরিকৃতং ভযম্ ।

ত্রিকালপঠনাদস্য সিদ্ধিঃ স্যাত্ করসংস্থিতা ॥ ১৩১॥

ব্রাহ্মে মুহূর্তে চোত্থায প্রত্যহং যঃ পঠেন্নরঃ ।

ঐহিকামুষ্মিকান্ সোঽপি লভতে নাত্র সংশযঃ ॥ ১৩২॥

সঙ্গ্রামে সন্নিবিষ্টানাং বৈরিবিদ্রাবণং ভবেত্ ।

জ্বরাপস্মারশমনং গুল্মাদিব্যাধিবারণম্ ॥ ১৩৩॥

সাম্রাজ্যসুখসম্পত্তিদাযকং জপতাং নৃণাম্ ।

য ইদং পঠতে নিত্যং পাঠযেদ্বা সমাহিতঃ ।

সর্বান্ কামানবাপ্নোতি বাযুপুত্রপ্রসাদতঃ ॥ ১৩৪॥

॥ শ্রী আঞ্জনেযসহস্রনামস্তোত্রং হনুমৎসহস্রনামস্তোত্রং চ সম্পূর্ণম্ ॥

From Hanumatstutimanjari, Mahaperiaval Publication

Duplicate encoding by Saraswathy Ravishankar Mayavaram

Proofread by PSA Easwaran psaeaswaran at gmail.com

This text differs from commonly given in Gitapress publication

(especially verses 12, 18, and portion after 123).

That is said to be from mantramahArNava, pUrvakhaNDa, navamataranga,

and is supposed to be rAmakRitam. With such variations in Sanskrit texts,

the reader is forewarned to be practical and bring up devotion selecting any

text rather than getteing caught in details.

With such variations, there is no loss of generality.

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Anjaneya Sahasranama Stotram Lyrics in Bengali PDF
% File name : anjaneya1000.itx
% Category : sahasranAma
% Location : doc_hanumaana
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Saraswathi, Shri Devi Kumar, PSA Easwaran
% Proofread by : PSA Easwaran psaeaswaran at gmail
% Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication
% Acknowledge-Permission: Late Vaidya S.V. Radhakrishna Sastri
% Latest update : April 7, 2015
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org

%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website